स्नानम् *(त्यसपछि चिरिएको पेट सिलाएर घिउ लेपन गरी यी मन्त्रले स्नान गराउनुपर्छ)–*

आपो हिष्ठा मयोभुवस्ता नऽऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

(शु.यजुर्वेद, ३६।१४–१६)

तदनन्तरात् चिताग्निदान कार्यम् *(यसपछि दागवत्ती संस्कार गर्नुपर्दछ)। गर्भिणी मरण पापको प्रायश्चित्त पतिले गर्नु पर्दछ।*

बालकमरणे विधिः

द्विवर्षाद् न्यूनवर्षस्य बालकमरणे खातौ स्थापनीयम् । द्विवर्षादधिक बालकमरणे तु दाहविधि करणीयम् । *(दाँत नआइकन बालकको मृत्यु भएमा मृत शिशुलाई शुद्धस्थलमा लगी गाड्नु पर्दछ । मृत्यु भएको दोस्रो दिनमा गृहशुद्धि गरी मृत बालकका निमित्त उपयुक्त वस्त्रादिका साथै दूध दान गर्नुपर्दछ। उदक दानादि केही गर्नुपर्दैन (आशौच विवेचन, पृ.५४)। दाँत आइसकेको र दुईवर्ष पूरा नगरेको र चूडा कर्म पनि नभएको बालकको मृत्यु भएमा दाहसंस्कार गर्नु पर्दैन शुद्ध भूमिमा गाड्दा हुने कुरा याज्ञवल्क्यस्मृतिमा बताइएको छ (याज्ञवल्क्य स्मृति, ३।१)। यसैगरी जल पिण्ड दान आदि कर्म भने गर्नु पर्दैन (मनुस्मृति, ५।६८–६९)। मृतबालक समान उमेरका ब्राह्मण बालकलाई दान दक्षिणा गर्नु उचित हुन्छ (आशौच विवेचन, पृ. ५५)। व्रतबन्ध नभएको दुईवर्ष पूरा भएको बालकको मृत्यु भए चूडाकर्म गरेको भए वा नभए पनि दाहसंस्कार भने गर्नुपर्दछ। दशदिनका पिण्डदान ढिकुरो नउठाई सामान्य वेदीमा गरिन्छ। एघारौँका कार्य पनि गर्नुपर्दछ। सपिण्ड भने हुँदैन। सपिण्डको सट्टा एकोद्दिष्ट श्राद्ध गर्नुपर्दछ।*

(सुतिका र रजस्वलाको मरणभए एउटा घडामा जल राखी वस्त्र वेष्टित गरी जलमा पञ्चगव्य राखी

आपो हिष्ठा मयोभुवस्ता नऽऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥

तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ ।

आपो जनयथा च नः ॥ *(शु.यजुर्वेद, ३६।१४–१६)*

मन्त्रले अभिमन्त्रित गरी स्नान गराएर अर्को वस्त्रले वेरी स्नान गराउनुपर्छ।)

द्विपुष्करयोगमरणे विशेष-विधिः

द्विपुष्कर योगमा (भद्रा तिथि २, ७ र १२, आइत, मंगल र शनिवार मृगाशिरा, धनिष्ठा र चित्रा नक्षत्रको योग भएका समयमा) मृत्युभए कुशका दुई पुत्तला बनाई सङ्गल्पपूर्वक पूजा गरी प्रेतको शिर र आँखामा राखेर घृताहुतिपश्चात् दागबत्तीको कार्य गर्नुपर्दछ।)

सङ्कल्पः *(कुश, तिल र जल लिएर सङ्गल्प गर्ने)–*

अद्येत्यादि देशकालौस्मृत्वा अमुकगोत्रस्यामुकप्रेतस्य (गोत्रायाः प्रेतायाः) द्विपुष्करमरण–जनित–अनिष्टदोषपरिहारार्थं द्विपुष्करविधिं करिष्ये ।

पुत्तलपूजनम् *(चन्दन, अक्षता र पुष्पले पुत्तला पूजा गर्ने)–*

मृतितिथ्याधिष्ठातृदेवतायै नमः । मृतिवाराधीशाय नमः ।

मृतिनक्षत्राधिपतये नमः ।

पुत्तला प्रेतस्य शिर–नयनोपरिस्थापयित्वा घृताहुतिदानम् *(उक्त कुशका पुत्तला एउटा मृतकको शिरमा र अर्को आँखामा राखिदिने)*

घृताहुतिदानम् *(पुत्तलामा घिउको आहुति(धारा) दिने)–*
वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान् पराके । मेदसः कुल्याऽउप तान्त्स्रवन्तु सत्याऽएषामाशिषःसं नमन्ता ॐ स्वाहा । *(शु यजुर्वेद ३५।२०)*

यसपछि जलधारा समेत दिएर मात्र दागबत्ती दिनु पर्दछ।

त्रिपुष्करयोगे मरणे विधिः

त्रिपुष्कर योगमा (भद्रा तिथि २,७ र १२, आइत, मंगल र शनिवार, कृत्तिका, पुनर्वसु, उत्तराफाल्गुनी, विशाखा, उत्तराषाढा र पूर्वाभाद्रपदा नक्षत्रको योग भएका समयमा) मृत्युभए कुशका तीन पुत्तला बनाई सङ्गल्प गर्ने–

सङ्कल्पः– अद्येत्यादि देशकालौस्मृत्वा ...गोत्रस्य... प्रेतस्य (गोत्रायाः प्रेतायाः) त्रिपुष्करमरणजनित–अनिष्टदोषपरिहारार्थं त्रिपुष्करविधिं करिष्ये ।

पुत्तलापूजनम् *(चन्दन, अक्षता र पुष्पले पुत्तला पूजा गर्ने)–*

मृतितिथ्याधिष्ठातृदेवतायै नमः । मृतिवाराधीशाय नमः ।
मृतित्रिपान्नक्षत्राधिपतये नमः ।

कुशपुत्तला प्रेतस्य शिरे, नेत्रे, वामकुक्षौ च स्थापयित्वा घृताहुतिं जुहूयात् *(उक्त कुशका पुत्तलामध्ये पहिलो मृतकको शिरमा, दोस्रो आँखामा र तेस्रो मृततको बायाँ कोखमा राखिदिने।)*

घृताहुतिदानम् *(पुत्तलामा घिउको आहुति(धारा) दिने)–*
वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान् पराके । मेदसः कुल्याऽउप तान्त्स्रवन्तु सत्याऽएषामाशिषःसं नमन्ता ॐ स्वाहा । *(शु यजुर्वेद ३५।२०)*

तदनन्तरात् जलधारां च दत्वा चिताग्निदानं कार्यम् *(यसपछि जलधारा समेत दिएर मात्र दागबत्ती दिनुपर्दछ।)*

पञ्चकमरणे दाहविधिः

(पञ्चकमा मरण भए पाँचवटा कुशका प्रतिमा बनाई पाँचवटै प्रतिमामा क्रमशः प्रेत आवहनपूर्वक पूजा गरी पहिलो प्रतिमा शवको शिरमा, दोस्रो आँखामा, तेस्रो वायाँ कोखमा, चौथो नाइटोमा, पाँचौ प्रतिमा खुट्टामा राखी घिउको आहूति दिनुपर्छ)

सङ्कल्पः *(हातमा कुश, तिल, जल लिएर सङ्गल्प गर्ने)*

अद्येत्यादि देशकालौस्मृत्वा अमुकगोत्रस्यामुकप्रेतस्य धनिष्ठादि पञ्चकमरणजनित–वंशानिष्टपरिहारार्थं पञ्चकविधिं करिष्ये ।

कुशप्रतिमापूजनम् *(पाँचवटै प्रतिमामा क्रमशः प्रेत आवहनपूर्वक चन्दन, अक्षता र पुष्पले पूजा गर्ने)–*

१. **प्रेतवाहाय नमः ।** २. **प्रेतसखाय नमः ।**
३. **प्रेतपाय नमः ।** ४. **प्रेतभूमिपाय नमः ।**
५. **प्रेतहर्त्रे नमः ।**

प्रेतशिर–नेत्र–वामकुक्षौ–नाभि–पादस्थाने कुशप्रतिमास्थापनपूर्वकं अनेन मन्त्रेण घृताहुतिर्जुहूयात्

(यसपछि पहिलो प्रतिमा प्रेतको शिरमा, दोस्रो आँखामा, तेस्रो वायाँ कोखमा,चौथो नाइटोमा, पाँचौ प्रतिमा खुट्टामा राखी निम्न मन्त्रले घिउको आहूति दिने) –

१. **प्रेतवाहाय स्वाहा ।** २. **प्रेतसखाय स्वाहा ।**
३.**प्रेतपाय स्वाहा ।** ४. **प्रेतभूमिपाय स्वाहा ।**
५. **प्रेतहत्रे स्वाहा ।**

यमाय सोमं मधुमत्त येषां ते नो गावः स्वदन्तु हव्या ॥ दूतं वो देवः स्वदयं मुमेषा ते नो रासन्तमुरुमायमद्य यूयं यातः स्वस्तिभिः सदा नः ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिवबन्धनान्मृत्योर्मूक्षीयमाऽमृतात् ।
कृत्वा तु दुष्कृतं कर्म जानता वाऽप्यजानता ।
मृत्युकालवशं प्राप्तं नरं पञ्चत्वमागतम् ।
धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ।
देहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु ॥
असौ स्वर्गाय लोकाय स्वाहा गच्छतु पावकम् ।

इति मन्त्राभ्यां प्रतिमासु प्रत्येकं घृताहुतीर्जुहुयात् ।
तदनन्तरात् जलधारां दत्वा चिताग्निदानं कार्यम् ।
(यसपछि जलधारा दिई दागवत्ती दिने)
डा नारायणप्रसाद निरौलाद्वारा लिखित अन्त्यकर्मी(वधिः पुस्तकबाट साभार।

आशौच विचार

जूठो सुतक विचार

निषेधार्थक नञ् (न शुचि अशुचिः) को शुचि शब्दसँग समास भएर अशुचि शब्द बन्दछ। अशुचि शब्ददेखि **अशुचेर्भाव**ः यस अर्थमा अण् प्रत्यय भएर आशौच शब्दको निर्माण हुन्छ (वाचस्पत्यम्) । जसको अर्थ अपवित्र, अशुद्ध वा बिटुलो भन्ने लाग्दछ *(संस्कृत नेपाली बृहत् शब्दकोश, पृ. १०७)*। हाम्रा देव एवं पितृ कार्य शुद्ध भएको अवस्थामा गर्नुपर्ने शास्त्रीय विधान रहेको छ। आशौच आफन्तको जन्म वा मृत्यु भएका वेला पर्ने गर्दछ। यस्तो समयमा अपवित्र रहने भएकाले आशौच भनिएको हो। आशौच दुईप्रकारका हुन्छन् : जनाशौच र मरणाशौच। आफन्तमा जन्म हुँदा जननाशौच रहने गर्दछ। जसलाई सूतक भनिन्छ। यसैगरी आफन्त कोही कसैको मृत्युहुँदा मरणशौच हुन्छ। जसलाई जुठो भनिन्छ।

दिशा–पिसाव गर्दा पनि शरीरमा अशुद्धि रहने गर्दछ। जो स्नानले शुद्ध हुन्छ। जनन र मृताशौच भने कुलव्यापी हुने भएकाले निश्चित व्यक्तिलाई निश्चित समयसम्म रहने गर्दछ। जुन शुद्धिका लागि काल र स्नान दुवैको अपेक्षा रहेको हुन्छ *(रामचन्द्रगौतम, आशौच विवेचन, पृ. ९)।*

जननाशौच (सूतक)

जननाशौचलाई सूतक पनि भनिन्छ। बच्चाको नालकाटेपछि सूतक आरम्भ हुन्छ। बच्चा जन्माउने स्त्री दश रातसम्म अशुद्ध रहन्छन्। यसैगरी स्त्रीका पतिले पनि जन्मेको सुन्ने वित्तिकै सचैल (वस्त्र सहित) स्नान गर्नुपर्दछ। सो पश्चात् पुरुष अरुसँग स्पर्श गर्न योग्य हुन्छन्। आशौच भने दशरातसम्म नै रहन्छ। अरु सपिण्ड भने अस्पृश्य हुँदैनन्। सुत्केरीलाई छोएपछि भने स्नान गरी पञ्चगव्य प्राशन गर्नु पर्ने विधान रहेको छ। पुरुषले छोएमा शुद्धभई जनै पनि फेर्नु पर्दछ।

सपिण्डहरू दशरात्रपछि स्नान एवं पञ्चगव्य प्राशन गरेर शुद्ध हुन्छन्। सपिण्ड भनेका सातपुस्ता भित्रका दाजुभाइ हुन्। सुत्केरी भने छोरा पाएको भए बीसदिन र छोरी पाएको भए तीस दिनपछि मात्र शुद्ध हुन्छन् भनी षडशीतिन्मा बताइएको छ। गाई भैँसी आदि पशु सुत्केरी भएमा पनि उक्त दुध दश दिनसम्म अशुद्ध रहन्छ। शुद्ध नभएसम्म उक्त दही दुध आदि वस्तु पूजामा चढ्दैनन्। कुवा इनारको पानी पनि खनेको दशदिनसम्म अशुद्ध रहन्छ। सुतक दशदिने दाजुभाइ(सपिण्ड)मा मात्र लाग्ने गर्दछ।

सुत्केरी भएको सपिण्डमा पुनः अर्को सुत्केरी थपिए दोस्रो सुत्केरी भएको दश दिनपछि मात्र पहिलोको पनि नामकरण गर्नु पर्दछ। यस्तो अवस्थामा पनि छैटौँ दिनमा छैटी पूजा गर्न भने कुनै बाधा व्यवधान रहँदैन भनी षडशीतिमा उल्लेख पाइन्छ। यसैगरी घरमा सुत्केरी भएकी छोरीको माइतमा सुतक लाग्दैन। माइतीघरमै सुत्केरी भएको अवस्थामा भने माइतीलाई पनि सूतक लाग्ने गर्दछ।

मृताशौच (जुठो)

आफन्तमा कसैको मृत्यु भए मृताशौच पर्दछ। मृताशौच मृत्यु भएको कुरा स्पष्ट थाह भएपछि मात्र लाग्दछ (आशौच–विवेचन, पृ. २०) । दशदिनसम्म बार्नुपर्ने मृताशौच सपिण्डदेखि बाहिरका व्यक्तिमा पनि लाग्दछ। आमातर्फ पाँच पुस्ता र बुबा तर्फका सातपुस्ता नाघेपछि मात्र सपिण्ड निवृत्ति हुन्छ। मृतकका पुत्र र पत्नी सपिण्ड नगरुञ्जेलसम्म अस्पृश्य (अरुले छुन नहुने) रहन्छन् । आशौच अवधिभर सन्ध्योपासना, वेदाध्ययन, पञ्चमहायज्ञ, दान, जप, व्रत, पूजा, उपासना, उत्सव, यज्ञादि कुनै पनि श्रौत र स्मार्त कर्म गर्नु हुँदैन (पूर्ववत्, पृ. १८) । मृतकका पुत्र र पत्नी वर्षदिनसम्म नै अशुद्ध रहन्छन् (पूर्ववत्, पृ. १८)। यो समयमा मांगलिक कार्य गरिँदैन। मृतकका पुत्र र पत्नी वर्षदिनसम्म नै अशुद्ध रहन्छन् (पूर्ववत्, पृ. १८)। यो समयमा मांगलिक कार्य गरिँदैन।

बाल मरणाशौच

चारमहिना सम्मको गर्भ स्राव भए जति महिनामा श्राव भएको हो त्यति दिन गर्भ रहेकी आमालाई मात्र सुतक लाग्दछ। बाबुले स्नान गर्दा हुन्छ। अरुलाई केही गर्नु पदैन। पाँचदेखि छ महिनासम्मको गर्भपात भएमा छ दिन आमाले आशौच बार्नु भनिएको छ। यसैगरी बाबुलाई भने तीन दिन आशौच लाग्ने गर्दछ *(मनुस्मृति, ५।६६)*। सात महिनाको गर्भे बालकको मृत्यु भएमा बाबु, आमा र सपिण्डलाई दशदिन आशौच लाग्छ *(आशौच विवेचन, पृ. ३५)*। नाल काटिसकेको बालकको मृत्यु भएमा पनि दशदिन नै आशौच बार्नुपर्दछ। यसैगरी दान प्रदान, हवनादि केही गर्नुपर्दैन *(पूर्ववद्, पृ. ३५)*।

दाँत नआइकन बालकको मृत्यु भएमा मृत शिशुलाई शुद्धस्थलमा लगी गाड्नु पर्दछ। यस्तो अवस्थामा बुबा र आमाले एकदिनरात आशौच बार्नुपर्दछ। सपिण्डले स्नान गरे हुन्छ। मृत्यु भएको दोस्रो दिनमा गृहशुद्धि गरी मृत बालकका निमित्त उपयुक्त वस्त्रादिका साथै दूध दान गर्नुपर्दछ। उदक दानादि केही गर्नुपर्दैन *(पूर्ववत्, पृ.५४)*।

दाँत आइसकेको र दुईवर्ष पूरा नगरेको र चूडा कर्म पनि नभएको बालकको मृत्यु भएमा दाहसंस्कार गर्नु पर्दैन शुद्ध भूमिमा गाड्दा हुने कुरा याज्ञवल्क्यस्मृतिमा बताइएको छ (याज्ञवल्क्यस्मृति, ३।१)। यस्ताको आशौच बाबुआमाले तीन दिन बार्नुपर्छ सपिण्डले स्नान गर्दा हुन्छ। यसैगरी जल पिण्ड दान आदि कर्म भने गर्नु पर्दैन *(मनुस्मृति, ५।६८–६९)*। मृतबालक समान उमेरका ब्राह्मण बालकलाई दान दक्षिणा गर्नु उचित हुन्छ *(आशौच विवेचन, पृ. ५५)*।

व्रतबन्ध नभएको दुईवर्ष पूरा भएको बालकको मृत्यु भए चूडाकर्म गरेको भए वा नभए पनि दाहसंस्कार भने गर्नुपर्दछ। दशदिनका पिण्डदान ढिकुरो नउठाई सामान्य वेदीमा गरिन्छ। एघारौँका कार्य पनि गर्नुपर्दछ। सपिण्ड भने हुँदैन। सपिण्डको सट्टा एकोद्दिष्ट श्राद्ध गर्नुपर्दछ। यस्तो आशौच बाबुआमालाई तीन दिन र सपिण्डलाई एक दिन लाग्छ। चूडाकर्म गरेको छ भने सपिण्डलाई पनि तीनदिन आशौच लाग्छ *(आशौच विवेचन, पृ. ५५)*। बाह्रौँ दिनमा समान उमेरका ब्राह्मण बालकलाई यथाशक्य वस्त्रादि दिई भोजन गराउनु पर्दछ।

वाग्दान भएकी कन्याको मृत्यु भएमा

वाग्दान (टीकाटालो) भने भएकी तर विवाह नभएकी कन्याको मृत्यु भएमा घर र वर दुवैपक्ष सपिण्ड र बाबुआमा सबैलाई तीन दिन आशौच लाग्छ (धर्मसिन्धु, पृ. ८९५)। क्रियाकर्म भने पिताको पक्षबाट नै गर्नुपर्दछ।

विवाहिता छोरीको आशौच

विवाह भएकी छोरीको मृत्यु भएमा बाबु, आमा र सौतनी आमाले तीन दिन आशौच बार्नुपर्दछ (मनुस्मृति, ५।६३)। माइती घरमै विवाहिता छोरीको देहान्त भए बाबु, आमा र सौतेनी आमालाई दश दिन, दाजुभाइ सहोदरलाई तीन दिन र भिन्न नभई बसेका जेठा कान्छा बुबा, आमा आदि सपिण्डलाई एकदिनरात आशौच लाग्छ (षडशीतिको श्लो. ४७)। माइत गएका बखत बाबुको घरबाहेक अन्यत्र मृत्यु भएमा बाबुआमालाई तीन दिन र सहोदर र सापत्न्य दाजुभाइलाई ३६ घण्टा आशौच लाग्ने गर्दछ।

विवाह भएकी छोरीलाई बाबुआमाको आशौच

विवाहिता छोरीले बाबु आमा र सौतेनी आमाको आशौच तीन दिन बार्नुपर्दछ (निर्णयसिन्धु, पृ. ६९९)। बाबुआमाकै घरमा बसेकी छोरी भए दशै दिन बार्नुपर्दछ (मनुस्मृति, ५।१०२)। जेठा बुबा–आमा, काका–काकी आदिको मृत्युमा भतिजीले स्नान गरे मात्र पुग्छ। विवाहिता भतिजीको मृत्युमा पनि जेठा बुबा–आमा, काका काकीले स्नान मात्र गर्दा हुन्छ (निर्णयसिन्धु, पृ.६९९)। आशौच परेको घरमै गएर बस्ने, सोही घरको अन्न खाने आशौचीसँग सम्पर्क गर्ने गरेमा छोरी मात्र नभई अरुलाई पनि दशै दिन आशौच लाग्ने गर्दछ –

यद्यन्नमत्ति तेषां तु दशाहे नैव शुद्ध्यति (मनुस्मृति, ५।१०२)

दिदी बहिनी र दाजुभाइमा आशौच विचार

सामान्यतः दाजुभाइलाई दिदीबहिनीको आशौच पक्षिणी (३६ घण्टा) लाग्दछ (*निर्णयसिन्धु, पृ. ६९९*)। दाजुभाइका घरमा मृत्यु भएका दिदी बहिनीको दाजुभाइ र भाउजू बुहारीलाई तीन दिन जुठो लाग्दछ। यसैगरी दिदी बहिनीका घरमा दाजुभाइको मृत्यु भएमा पनि दिदी, बहिनी र भिनाजु ज्वाइँलाई समेत तीन दिन नै आशौच लाग्छ (षडशीति, श्लो. ५०)। घरदेखि अन्यत्र मृत्यु भएमा ३६ घण्टा मात्र आशौच लाग्दछ। सौतेनी दिदीभाइ दाजुबहिनीमा पनि पक्षिणी (३६ घण्टा) आशौच लाग्दछ।

मामा भानिजमा आशौच विचार

व्रतबन्ध गरेका मामाको भानिज/भाञ्जीलाई तीन दिन, व्रतबन्ध नगरेकाको एक दिन आशौच लाग्छ। यसैगरी व्रतबन्ध गरेका भनिजको मामा माइजुलाई तीन दिन र व्रतबन्ध नगरेका भानिजको एक दिन आशौच लाग्छ। विवाहिता भाञ्जीको मरणमा भने मामा माइजुले स्नान गरे मात्र पुग्छ *(आशौच विवेचन, पृ. ६०)*।

मावली हजुरबुबा हजुरआमाको आशौच

मावली हजुरबुबा र हजुआमाको आशौच नजिक भए तीन दिन र टाढा भए ३६ घण्टा लाग्छ *(पूर्ववत्, पृ ६१)*। यसैगरी छोरीका छोराको व्रतबन्ध भएको भए तीन दिन र नभएको भए ३६ घण्टा मावली हजुरबा र हजुरआमालाई जुठो लाग्छ। नातिनीको हजुरबा हजुरआमालाई एक दिन लाग्छ। नातिनीलाई पनि हजुरबाको एकै दिन आशौच रहने गर्दछ।

सानीआमा, ठूलीआमा, फुपू, गुरु आदिको आशौच

आफ्ना सानीआमा, ठूलीआमा र फुपूहरूको, बुबाका सानीआमा, ठूलीआमा र फुपूहरूको, आमाका सानीआमा, ठूलीआमा र फुपूहरूको, सानीआमा, ठूलीआमा र फुपूका छोराहरूको, आमाका मामाका छोराको, आमा बुबाका मामा माइजूको पक्षिणी (३६ घण्टा) आशौच लाग्ने गर्दछ (पूर्ववत्, पृ. ६२)। धर्मपुत्रको तीन दिन आशौच लाग्छ। गायत्री गुरुको नजिक भए तीन दिन र टाढा भए ३६ घण्टा जुठो लाग्दछ। यसैगरी अध्ययनरत शिष्यको गुरुलाई तीनदिन र अध्ययनबाट निवृत्त भएको भए ३६ घण्टा आशौच लाग्छ।

सासू ससुराको आशौच

सासू ससुराको छोरी ज्वाइँलाई नजिक भए तीन दिन र टाढा भए एकदिन आशौच लाग्छ। छोरी ज्वाइँ, बहिनी ज्वाइँ, भिनाजु, व्रतबन्ध गरेको सालो, जेठान, विवाहिता साली र जेठीसासूको एक दिन आशौच लाग्छ। जेठानका छोराहरूको भने स्नान मात्रले शुद्ध हुन्छ *(पूर्ववत्, पृ. ६३)।*

हजुरबा हजुरआमाको नाति नातिनालाई आशौच

घरको नातिलाई हजुरबा हजुरआमाको आशौच दश दिन लाग्छ। चूडा गरेको वा ३ वर्ष पूरा भएको नातिले पनि दशै दिन आशौच बार्नुपर्छ। यसैगरी विवाह भएकी नातिनीलाई एकदिन जुठो लाग्छ। अविवाहिता छोरीलाई बुबा आमाको वाहेक अरुको आशौच लाग्दैन। अतः अविवाहिता नातिनीले स्नान गर्नाले शुद्ध हुन्छ।

कसको आशौच कति दिन लाग्छ ?

बाबु आमाको आशौच एक वर्ष लाग्छ, सौतेनी आमाको आशौच छ महिना लाग्छ , श्रीमतीको आशौच तीन महिना लाग्छ, दाजुभाइ र छोराको आशौच ४५ दिन र अरु सपिण्ड बन्धुको एक महिना लाग्छ :

पितुरब्दमथाशौचं तदर्धं मातुरेव च ।

मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥ अन्येषां तु सपिण्डानामाशौचं मासम्मितम् ॥ *(धर्मसिन्धुःसुधा– ४७३)*

अधिमासमा आशौच र वार्षिक श्राद्ध

आशौच बारेको वर्षदिनभित्र अधिमास परे थप एउटा मासिक श्राद्ध गर्नुपर्दछ । **यदा मरणादारभ्य द्वादशमासमध्ये कश्चिदधिकमासः पतेत्तदा तन्मासस्थं मासिकश्राद्धमधिके शुद्धे मासे चेति द्विवारं कार्यमिति सप्तदश श्राद्धानि भवन्ति ।** (धर्मसिन्धु, पृ. ३७८) अधिमासको कृष्णपक्षमा मृत्यु भए पुत्रादिले थप एक महिना अर्थात् तेह्र महिना आशौच बार्नुपर्दछ। **मलमासे मृतस्य तु एकादशाहे आद्यमासिकं कृत्वा द्वितीय–मासमृततिथौ तत्पुनः कृत्वा किञ्चिदूने द्वितीयमासे ऊनमासिकं तृतीयमासारम्भे द्वितीयमासिकं सार्धद्विमासान्ते त्रैपाक्षिकम् ॥** (धर्मसिन्धु, पृ. ३७८) जस्तै अधिक ज्येष्ठ कृष्णपक्ष चतुर्थीमा देहान्त भए आउँदो असार कृष्ण चतुर्थी तिथिमा वार्षिक श्राद्ध गर्नुपर्दछ। यसैगरी पछि पर्ने एकोद्दिष्ट श्राद्ध गर्दा पनि त्यही आषाढ कृष्ण चतुर्थी तिथि नै लिनुपर्दछ। पछि फेरि ज्येष्ठ महिनामा अधिमास परे अधिक ज्येष्ठकृष्ण पक्षको चतुर्थी तिथिमा पिण्ड रहित श्राद्ध गर्नुपर्छ। आषाढ चतुर्थीमा भने पिण्ड सहितको श्राद्ध गर्नुपर्छ – पिण्डवर्ज्यमसङ्क्रान्ते संक्रान्ते पिण्डसंयुतम् । प्रीतसंवत्सरं श्राद्धमेवं मासद्वयेऽपि च ॥ (गरुडपुराण, प्रेतकल्प, १३।१०५) अधिक मासको शुक्लपक्षमा मृत्यु भएकाको वार्षिक भने त्यही महिना, पक्ष र तिथिमा गर्नुपर्छ। अर्थात् बाह्र महिना आशौच रहने गर्दछ। जस्तै अधिक ज्येष्ठ शुक्लपक्षको चतुर्थी तिथिमा मृत्यु भए अर्को वर्षको ज्येष्ठ शुक्ल चतुर्थीमा नै वार्षिक श्राद्ध गर्नुर्पछ। ज्येष्ठ शुक्ल पक्षको तिथि नै एकोद्दिष्ट श्राद्धका निम्ति पनि लिनुपर्छ। यसरी शुक्लयजुर्वेदाध्यायी माध्यान्दिनीय शाखाअन्तर्गतकाले वार्षिक श्राद्ध गर्दा एकोद्दिष्ट विधिले नै गर्नुपर्दछ (याज्ञावल्क्यस्मृति, आचाराध्याय श्लो २५६ को मिताक्षरा टीका)। अन्य शाखा सूत्रकाले एकपार्वण गर्ने वचन पनि पाइन्छ।

वरखी बारेका बेला श्राद्ध एवं क्रियाकर्म विचार

बुबाको वरखी बार्नेले आमा लगायत अरु कसैको पनि श्राद्ध गर्नु हुँदैन । यसैगरी आमाको वरखी बारेको अवस्थामा भने बुबाको मात्र श्राद्ध गर्न छुट दिइएको छ। अरु कसैको पनि श्राद्ध गर्नु हुँदैन भनी धर्मसिन्धुमा बताइएको छ – पितर्युपरते पुत्रो मातुः श्राद्धनिवर्तते। मातर्यपि च वृत्तायां पितृश्राद्धादृते समम्॥ (निर्णयसिन्धु, पृ. ८२१)

बाबु आमाको बरखी बारेका बेला सामान्यतः अरु कसैको क्रियाकर्म गर्नुहुँदैन। तर पत्नी, छोरो, छोराबुहारी, नाति, दाजुभाइ, दाजुभाइका छोरा, जेठा कान्छा बुबा र जेठी कान्छी आमाको मृत्यु भएको खण्डमा कोही क्रिया गर्ने मान्छे नभएको अवस्थामा भने क्रियाकर्म गर्नु हुने धर्मशास्त्रको निर्णय पाइन्छ। **पत्नी पुत्रस्तथा पौत्रो भ्राता तत्तनयः स्नुषा । मातापितृव्यश्चैतेषां महागुरुनिपातने ॥**

कुर्यात्सपिण्डनं श्राद्धं नान्येषां तु कदाचन ॥ *(धर्मसिन्धु, पृ. ९६२)*

आमाको बरखी बारेका बेला बाबुको मृत्यु भएमा

आमाको मृत्यु भएको वर्षदिनभित्र बुबाको देहान्त भएमा बाुब र आमा दुबैका वार्षिक श्राद्ध एकैदिन गर्नुपर्दछ। यसरी एकैदिन गर्दा बुबाको मृत्यु पछाडि भए पनि पहिले बाबुको वार्षिक श्राद्ध गर्नुपर्दछ। सो पश्चात् स्नान गरेर आमाको वार्षिक श्राद्ध गरिन्छ। आमाका वर्षदिनसम्मका मासिक श्राद्ध सकिएपछि बुबाको वार्षिक तिथिसम्म पर्खिएर बस्नु पर्दछ। बुबाको क्रिया र मासिकादि सबै यथा समयमा हुन्छ *(आशौच विवेचन, पृ. २११)*।

बाबुको वरखीमा आमाको मृत्यु भएमा

बाबुको वरखी बारेका बेला आमाको मृत्यु भएमा आमाको पनि सबै दशाहादि क्रियाकर्म एवं मासिकादि गर्दै जानुपर्दछ। बाबुको मासिक र वार्षिक श्राद्ध पनि क्रम अनुसार नै गर्नुपर्दछ। आमाको वरखीले बाबुको वार्षिक श्राद्ध निश्चय नै रोकिँदैन (आशौच विवेचन, पृ. २१०)। आमाको वरखी (वार्षिक श्राद्ध) भने आमाकै वर्षदिन पुगेको तिथिमा गर्नुपर्दछ।

मासिक वा वार्षिकमा ग्रहण परेमा

मासिक वा वार्षिक श्राद्धका दिन ग्रहण परे पनि त्यसै दिन यथा समयमा पायस पिण्ड दिएर नै श्राद्ध गर्नुपर्दछ। सपिण्डीकर श्राद्ध पनि गर्नुहुने आशौच विवेचनाः (पृ.२०९)मा बताइएको छ।

– संस्कार सुलोचना पुस्तकबाट साभार

षट्पिण्डदानम्

(अन्त्यकर्मको एकैपटकमा छवटा पिण्डदान दिने संक्षिप्त विधि)

अन्त्यकर्मअन्तर्गत चिता पखालिसकेपछि स्नान गरी अपसव्य भई जौको पीठो वा चामलको पीठोमा दूध राखी एकै स्थानमा छ वटा पिण्ड दिने चलन पनि छ। (अन्त्यपद्धति, पृ. ३२–३३)

स्नान सङ्कल्पः *(कुश, तिल र जल लिएर सङ्कल्प गर्ने)–*

अद्य...गोत्रस्य...प्रेतस्य दाहपिण्डोदकदानाधिकारसिद्ध्यर्थं स्नानमहं करिष्ये। ततः अवनेजनम् पिण्डदानम् प्रत्यवनेजनं च दद्यात्।

यसपछि तलका सङ्कल्पपूर्वक अवनेजन, पिण्डदान र प्रत्यवनेजन दान गर्नुपर्दछ।

षट्–पिण्डदान–तालिका

	अवनेजनम्	पिण्डदानम्	प्रत्यवनेजनदानम्
१.	अद्य...गोत्र.. प्रेत	अद्यामुकगोत्र....प्रेत (गोत्रे प्रेते) **मृत्युस्थाने शव नामैष पिण्ड**स्ते मया दीयते तवोपतिष्ठताम्।	अद्य....गोत्र....प्रेत (गोत्रे प्रेते) मृत्युस्थाने पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।
२.	द्वारस्थाने	**द्वारस्थाने पान्थ नामैष पिण्डस्ते**	द्वारस्थाने पिण्डप्रत्यवनेजनं
३.	चत्वरस्थाने	**चत्वरस्थाने खेचरनामैष पिण्डस्ते**	चत्वरस्थाने पिण्डप्रत्यवनेजनं
४.	विश्रामस्थाने	**विश्रामस्थाने भूतनामैष पिण्डस्ते**	विश्रामस्थाने पिण्डप्रत्यवनेजनं
५.	काष्ठसञ्चयस्थाने	**काष्ठसञ्चयस्थाने प्रेतनामैष पिण्डस्ते**	काष्ठसञ्चयस्थाने पिण्डप्रत्यवनेजनं
६.	चितास्थाने	**चितास्थाने साधकनामैष पिण्डस्ते**	चितास्थाने पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम्।

प्रार्थना

सव्येन प्रार्थयेत् *(सव्य भई प्रार्थना गर्ने)* –

अनादिनिधनो देवः शङ्खचक्रगदाधरः।

अक्षय्यः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥

तोयाञ्जलि

अपसव्येन कुशतिलजलान्यादाय *(अपसव्य भई कुश, तिल, जल अँजुलीमा लिएर भुइँमा छोडिदिने)*– **अद्य...गोत्र...प्रेत (गोत्रे/प्रेते) चितादाहजनित–तापतृषोपशमनाय एष तिलकुशतोयाञ्जलिर्मद्दत्तस्तवोपतिष्ठताम्।** इत्युक्त्वा भूमौ सकृदुदके सर्वे प्रक्षिपेयुः। *यसपछि मलामि गएका जतिले अपसव्य भई सचैल (लुगा सहितनै) स्नान गर्नुपर्छ। जलाञ्जलिप्रदान, धूपकाँडे ग्रहण गरी मलामीको बीचमा क्रियापुत्री रही बालक र स्त्रीलाई अघि लगाई वासस्थलमा आउने र क्रियाकर्ता धागोले घेरिएको भागभित्र रही उपवास विधि अपनाई बस्नुपर्दछ।*

अन्त्यकर्ममा आवश्यक सामग्री

दाहसंस्कारका सामग्री

शवलाई फेराउने धोती, जनै, चन्दन, फूल, अविर, माला, लावा, पीताम्बर, चिता बनाउने दाउरा, श्रीखण्ड, तुलसीको डाँठ, कपुर, घिउ, सुनका टुक्रा, चाँदी रत्न।

छातीमा राखिदिने – चामल, पैसा, वस्त्र। चिता पिण्ड दिने– गाइको दुध, चामल, तिल, कुश। अञ्जलि दिने – तिल, कुश। जलाउने – पर्याप्त दाउरा।

अन्त्यकर्ममा आवश्यक सामग्री

दशगात्रविधिको सामग्री

कुश, तिल, सस्यूँ, गाईको दुध, चामल, उशीर(खसखसको जरा), श्रीखण्ड, भृङ्कीराज, तिलको तेल, घिउ, मह, केरा, पानको पात, सिङ्गो सुपारी, भेडाको ऊन, काँचो धागो। माटाको काँचो हाँडी। माटाको काँचो पाला, गोल्फू। सप्तधान्य, त्रिकाष्ठी– ५। एकसरा पातका दुना(खोचा)। झारी, फलामको टुक्रा, तितेपाती, बत्ती, बत्ती बाल्ने पाला, सप्तधान्य– जौ, धान, गहुँ, मास, तिल, चना, प्रियङ्गु (कागुनू)। सुन चाँदीका कोदाला।

अस्थिसञ्चयन र पाथेय श्राद्ध सामग्री

श्रीखण्ड, तिल, तितेपाती, चामल, बत्ती, घिउ, मह, दूध, ब्राह्मण थाप्ने चामल, एकसरो टपरीमा सिधा २ भाग। काँचो धागो, भेटी, दक्षिणा आदि।

एघार दिनको सामग्री

कार्यः नारायणबलि, मध्यमषोडशी, वृषोत्सर्ग, प्रेतशय्या, आद्यमासिक श्राद्ध, आद्याब्दिक श्राद्ध, उदककुम्भ दान, ऊनादि पञ्चदश मासिक।

मध्यमषोडशी श्राद्ध सामग्री

गउत, गोवर, चन्दन, अक्षता, पुष्प, फल, नैवेद्य, सेतो वस्त्र, सिधा १७, जनै ३२ वटा, सुपारी ३२ वटा, वालुवा, सलाई, कुश, पाती, दही, दुध, घिउ, मह, चिनी, धूप, बत्ती, दुना ६० वटा जति, टपरी ६० वटा जति, काँचो धागो, भेटी आदि।

नारायणबलि सामग्री

(अकाल मृत्यु, दुर्घटनाबाट मृत्यु, आत्महत्याबाट मृत्यु भए नारायणबलि गरिन्छ।)

१. ब्रह्मकलश, सेतो कपडा, कलश, गणेश, बत्ती, चाँदीको प्रतिमा
२. रुद्रकलश, तामाको प्रतिमा, रातो कपडा
३. यम कलश, फलामको प्रतिमा, कालो कपडा
४. प्रेत कलश, सीसा वा कुशको प्रतिमा, रेसमी कपडा
५. विष्णुकलश, सुनको प्रतिमा, पहेलो कपडा
६. तामाका कलश र थाली ६÷६ वटा
७. सुनका प्रतिमा २, चाँदीको प्रतिमा १, तामाको प्रतिमा १, सीसाको प्रतिमा– १, फलामको प्रतिमा– १।
८. सुनका टुक्रा ७ वटा, पञ्चरत्न, पान सुपारी
९. कपडा सेतो, पहेलो, कालो र रेसमी
१०.अग्निस्थापनाका सामग्री (१३ औं दिनकोमा बताए अनुसारका)
११. कुश, तिल, जौ, चन्दन, अक्षता, चामल, फल, नैवेद्य,सर्स्यूँ, जनै, सुपारी, पञ्चगव्य, काँसको थाली आदि।

वृषोत्सर्ग : बाछा-बाछी, वस्त्र, अग्निस्थापनाका पूजा सामग्री।

प्रेतशय्या : प्रेतशय्या (स्वर्गे हुनेले प्रयोग गर्ने वस्तु – खाट, सिरक, डस्ना, तन्ना, आसनी, भाँडा वर्तन, थाल, कचौरा, गिलास, वस्त्र, शृंगारका सामग्री आदि) ११ औंको भोजन गर्ने ब्राह्मण ब्राह्मणीलाई दिने।

आद्यमासिक : तिल, जौ, चन्दन, अक्षता, पुष्प, फल, नैवेद्य, सिधा २ भाग, जनै, सुपारी, बालुवा, खुद्रा पैसा, सेतो वस्त्र, दुध, घिउ आदि।

आद्याब्दिक : चन्दन, अक्षता, पुष्प, फल, नैवेद्य, सिधा २ भाग, जनै, सुपारी आदि।

उदककुम्भदान : सुनको प्रतिमा, खोचा वा भुङ्का र दतिउन (३६० वटा),माटाको ठूलो घडा–१, दीयो, बत्ती, कुश, जनै, सुपारी, फल, नैवेद्य, धूप, फूल, पाती, भेटी आदि।

ऊनादि पञ्चदश मासिक श्राद्ध : गउत, गोवर, तिल, जौ, चन्दन, अक्षता, पुष्प, फल, नैवेद्य, सेतो वस्त्र, सिधा ३४ (उक्त वर्ष अधिकमास पर्ने भए थप दुई सिधा), जनै ३५ वटा, सुपारी ३५ वटा जति, वालुवा, सलाई, कुश, पाती, दही, दुध, घिउ, मह, चिनी, धूप, बत्ती, दुना ८० वटा जति, टपरी ७० वटा जति,काँचो धागो, भेटी, सेतो वस्त्र ३ मिटर, बत्ती बाल्ने पाला २० वटा आदि।

बाह्रौं दिनका सामग्री

(सपिण्डीकरण, उत्तरपाथेय श्राद्ध)

१.जनै र सुपारी १५÷१५ वटा,
२.सुनको तार एक बित्ता बराबरको १ वटा।
३.चाँदीको तार एक भित्ता बराबरको १ वटा
।४.चन्दन, अक्षता, धूप, बात्ती
५.पूाालपाती ६.फल, नैवेद्य ७.सिधा ८ वटा।८. खुद्रा पैसा।
९. दही, दुध, घिउ, मह, गउत, गोवर, कुश, तिल, जौ आदि।
६. तेह्रौं दिनका सामग्री

अग्निस्थापना, पञ्चक शान्ति (पञ्चकम मृत्यु भए मात्र), पञ्चधेनु दान, पद दान, अष्टमहादान, शaया दान, गाईदान, गुरु दक्षिणा, गरुड पुराण दक्षिणा आदि।

अग्निस्थापना हवन सामग्री

१. दियो, बत्ती, वर्तन २. कलश ५ वटा ३.तिल आधा किलो ४. जौ आधा किलो ५.कुश ६.रेखीको पीठो ७. पञ्चगव्य (गाईको दुध, दही, घिउ, गउत, गोबर) ८. केशरी ९.रक्षाबन्धनको धागो १०. समिधा (दाउरा) ११. जनै १२.सुपारी १३.आँप, पिपलका पात, १४.दुवो, फूल, माला १५.घिउ १६. पञ्चामृत (गाईको दुध, दही, घिउ, मह र चिनी) १७.मह १८.दुध, दही १९.धान, चामल २०. सर्स्यूँ २२.सर्वौषधी २३.सप्तमृत्तिका २४.पञ्चरत्न २५.धूप २६.फलफूल, नैवेद्य २७.ब्राह्मण वरण सामग्री ब्राह्मणको संख्या अनुसार (वस्त्र, जनै, सुपारी , द्रव्य आदि)
२८. टपरी २९.सेतो र पहेलो कपडा (च्यातचुते)
३०.बोहोता ३१. दुना
३२.नरिवल।
३३. कपुर, ल्वाङ, सुकुमेल आदि।

पञ्चक शान्ति सामग्री

(पञ्चक परी देहान्त्य भएको अवस्थामा मात्र गर्ने)

तामाका ७ कलश, ७ थाली र सुनका ७ प्रतिमा।
१. विष्णुको प्रतिमा, कलश र स्थाली।
२. महामृत्युञ्जयको प्रतिमा, कलश र स्थाली।
३. धनिष्ठा नक्षत्रका अधिष्ठाता वसुका लागि प्रतिमा, स्थाली र कलश।
४. शतभिषाका अधिष्ठाता वरुणका लागि प्रतिमा, स्थाली र कलश।
५. पूर्वभाद्रपदनक्षत्रका अधिष्ठाता अजैकचरणका लागि प्रतिमा, स्थाली र कलश।
६.उत्तरभाद्रपदा नक्षत्रका अधिष्ठाता अहिर्बुध्न्यका लागि प्रतिमा ,स्थाली र कलश।
७. रेवती नक्षत्रका अधिष्ठाता पूषाका लागि प्रतिमा स्थाली र कलश।
८– चन्दन, अक्षता, फूल, फल, नैवद्य, मुग, मास, कागुनु, धान, जौ, सर्वौषधी, कासको कचौरा, सुनको प्रतिमा तिल, तेल आदि।

दशदान – गाई, भूमि, तिल, सुन, घ्यू, वस्त्र, धान, सख्खर, चाँदी, नुन।

अष्टदान – १.सुन, २.फलाम, ३.कपास, ४.तिल, ५.नून ६.भूमि ७.गाई ८. सप्तधान्य

पञ्चधेनुदान –पाप, ऋण, प्रायश्चित्त, मोक्ष र उत्क्रान्ति धेनु दान।

पददान सामग्री : १. छाता, २. जुता, ३. वस्त्र, ४.सुनको औँठी, ५. कमण्डलु, ६. आसन , ७. पञ्चपात्र, ८.लौरो, ९.तामाको भाँडो, १०. अमान्न (काँचो अन्न, चामल), ११. पक्वान्न, १२. भोजन–द्रव्य १३, जनै। (गरुडपुराण, प्रेतकल्प, १३।८३–८५)

विष्णुलक्ष्मी शैय्यादान सामग्री

१.विष्णुलक्ष्मीको प्रतिमा – १। २. दीयो – १। कलश – १। ३.धूप, बत्ती ४.गीताको किताब। ५.शय्या (खाट,पलङ आदि) ६. सिरक, डस्ना, सिराने, तन्ना, झुल, आसनी) ७.आचमनी, पञ्चपात्रो, पञ्चपाला। ८.शङ्ख, घण्ट, लक्ष्मी नारायण भगवानको फोटो ९.थाल, कचौरा, गिलास, चम्चा, प्लेट, काँटा, १०. चक्कु ११.चक्ला, वेल्नी १२.चामल, दाल, पीठो १३.कुकर, कराई, पन्यु, भाडो, बाटा, आरी, तसला, डाडु, पन्यु आदि। १४. चुलो, इन्धन। १५. दौरा, सुरुवाल, कोट, टोपी, जुत्ता, मोजा, छाता, गञ्जी, वनियन, औंठी, घडी, ब्रस, मञ्जन, ब्लेड, रेजर आदि यथाशक्य। १६. सारी, चोलो, साया, टीका, चुरा, पोते, तिलहरी, फुली, सिन्दुर, काँटा, ऐना, धागो, लिविष्टिक, गाजल, रुमाल, औंठी, फूली, मुन्द्री, पाउजु, झोला आदि यथाशक्य।

गरुडपुराण दक्षिणा र सिधा

गरुडपुराणको दक्षिणा। २.सुनको औंठी ३. वस्त्र ४.सिधा (चामल, दाल, घिउ, नुन, मिश्री, चिनी, बेसार जिरा, धनिया, मरिच, नरिवल, चियापत्ती, कफी, फलफुल आदि) यथाशक्य।

मासिकश्राद्धका सामग्री

कुम्भ १। सेतो पहेलो चन्दन, फूल सहितको पूजा भाग। कालो तिल। गाईको दुध, घिउ। मह, केरा, पानको पात। फलफूल। रोटी नैवद्य। जनै। सुपारी। वस्त्र। वात्ती। कर्मपात्र। चामल। सिधा २। कुश, दुना। टपरी आदि।

तर्पण सामग्री

१. चन्दन। २. अक्षता। ३. कुश ४ पञ्चगव्य। गाईको गउँत, गोवर, दुध, दही, घिउ)। ५. तिल, जौ। ५. अर्घौतो, खगौतो (अर्घ दिने भाडो) ६. दही, दुध, घ्यु, मह। ७. सेतो वा पहेलो फूल। ८. धूप बात्ती। ९. फल नैवेद्य। १० वस्त्र। ११. तर्पण दिने भाडो, पूजा थाली।

श्राद्ध सामग्री

१. दीयो, बात्ती (१ मुठा), बत्ती बाल्ने घिउ वा तेल २. कुश ३. तिल, जौ ४. फलफूल। ५. नैवेद्य, मिठाइ। ६. सीधा २ भाग। ७. दुना ३० वटा। ८. टपरी। ९. बोहोता। १०. जनै। ११. सुपारी। १२. फूल पाती (सेता, पहेला), बालुवा, आफ्ना पितृको नामावली आदि।

पददान–तालिका

	प्रयोजनम्	वस्तु	देवता
१.	यमपथि बहुघर्मजन्यातपादि–दुःखनिवारणार्थं	**छत्रम्**	उत्तानाङ्गिरो–दैवतम्
२.	सन्तप्तवालुकासि–कण्टकादिजन्यदुःख–निवारणार्थं पददानान्तर्गत	इमे **उपानहौ**	उत्तानाङ्गिरोदैवते
३.	लज्जानिवारणार्थं	**वस्त्रं**	बृहस्पतिदैवतम्
४.	यमदूतभयनिवारणार्थं इमां पददानान्तर्गतं	**सुवर्णमुद्रिकाम्**	वह्निदैवताम्,
५.	तृषाजन्यदुःख–निवारणार्थमिदं	कमण्डलुस्थितं जलं **कमण्डलुम्**	वरुणदैवतं विश्वकर्मदैवतम्
६.	शीतजन्यदुःख निवारणार्थं	**आसनम्**	उत्तानाङ्गिरोदैवतम्
७.	आचमनार्थमिदं	**पञ्चपात्रम्**	विश्वकर्मदैवतम्
८.	यमपथि शरीरसंरक्षणार्थं	पददानान्तर्गतं **यष्टिं**	उत्तानाङ्गिरोदैवतम्
९.	यमपथि कार्यसम्पादनार्थं	**ताम्रपात्रं**	सूर्यदैवतम्
१०.	यमपथि क्षुधानिवारणार्थं	**अमाअन्नं**	प्रजापतिदैवतम्
११.	क्षुधानिवारणार्थं	**व्यञ्जनं** पक्वान्नं वा	विष्णुदैवतं
१२	यमपथि उदरपुरणार्थं	**भोजन–द्रव्यं**	यद्धातु तद्दैवतं
१३.	परिधानार्थं	**यज्ञोपवीतं**	ब्रह्मदैवतम्

पञ्चगव्यनिर्माणविधिः

अरोगाणां गवां गोमूत्रगोमयक्षीरदधिसर्पींषि कुशयुतमुदकञ्च पृथक् पृथक् सम्पादयेत्। *(निरोगी गाईको गउँत, गोबर, दुध, दही र घिउसहित कुश र जल राखी पञ्चगव्य सम्पादन गर्नुपर्दछ।)*

गोमूत्रस्थापनम् *(वरुणको ध्यान गरी तामाको भाँडामा गउँत राख्ने)* — **ॐ भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि। धियोयोनः प्रचोदयात्॥**

इति मन्त्रेण वरुणं ध्यायन् ताम्रपात्रे पलाशपत्रपुटे वा गोमूत्रं निक्षिपेत्।

तत्रैव गोमयस्थापनम् *(अग्निलाई ध्यान गरी गोबर राख्ने)*–

ॐ गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥

इति मन्त्रेण अग्निं ध्यायन् गोमयं तत्रैव निक्षिपेत्।

दुग्धस्थापनम् *(चन्द्रमालाई ध्यान गर्दै दुध राख्ने)* –

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे॥ *(यजु. १२।११२)* इति मन्त्रेण सोमं ध्यायन् तत्रैव क्षीरं निक्षिपेत्।

दधिस्थापनम् *(वायुलाई ध्यान गर्दै दही राख्ने)*–

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रणऽआयू ँ षि तारिषत्।

इति मन्त्रेण वायुं ध्यायन् तत्रैव दधि निक्षिपेत्।

घृतस्थापनम्–

ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टन्देवयजनमसि॥

इति मन्त्रेण घृतं निक्षिपेत्।

कुशोदकस्थापनम् –

ॐ देवस्य त्वा सवितुःप्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। अग्नये जुष्टं गृह्णाम्यग्निषोमाभ्याञ्जुष्टं गृह्णामि॥ *(यजु. १।१०)* इति मन्त्रेण कुशोदकं पवित्रञ्च निक्षिपेत्।

दूर्वाङ्कुराणिस्थापनम्–

ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि। एवानोदूर्वेप्रतनुसहस्रेणशतेन च। *(यजु. १३।२०)*

इति मन्त्रेण दूर्वाङ्कुराणि निक्षिपेत्।

ततो गायत्र्या दशवारमभिमन्त्र्य प्रणवेन कुशेन यज्ञियकाष्ठेन वाऽऽलोड्य प्राशनं कुर्यात्। *(कुश वा दुवोले पञ्चगव्य चलाउँदै दश पटक गायत्री मन्त्र जप गरी प्राशन गराउने)* :

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके। प्राशनात्पञ्चगव्यस्य दहत्वग्निरिवेन्धनम्॥

इति पञ्चगव्यनिर्माणप्राशनविधिः।

सर्षपविकिरणम्

हातमा सर्स्यूँ यज्ञको वरिपरि छर्किने –

ॐ अपसर्पन्तु ते भूता ये भूता भूमिमाश्रिताः। ये भूताः विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्। सर्वेषमविरोधेन पूजाकर्म समारभे॥

कर्मपात्रसम्पादनम्

आचम्य *(आचमन गर्ने)* –

ॐ केशवाय नमः। ॐ माधवाय नमः। ॐ नारायणाय नमः। *(हात धुने)* ॐ गोविन्दाय नमो नमः।

अक्षतपुञ्जोपरि कर्मपात्रस्थापनम् *(निम्न मन्त्र पढ्दै अक्षताको पुञ्ज माथि कर्मपात्र स्थापना गर्ने)* –

ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम्। अग्निर्मातस्मा देनसो विश्वान्मुञ्चत्वꣳ हसः॥१॥ ॐ यदि दिवायदि नक्तमेना ꣳ सिचकृमावयम्। वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः॥२॥ ॐ यदिजाग्रद्यदि स्वप्नऽ एना ꣳ सिचकृमावयम्। सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः॥३॥ *(यजु. २०।१४–१६)* ततः पवित्रस्थापनम् *(यो मन्त्रले कर्मपात्रमा कुशका टुक्रासहित पवित्र राख्ने, कुश पवित्रसमेत धारण गर्ने)* – **ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्यरश्मिभिः। देवीरापोऽअग्रेगुवोऽअग्रेपुवोग्रऽइममद्य यज्ञन्नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवम्॥** *(यजु. १।१२)*

ततः जलस्थापनम् *(यो मन्त्रले कर्मपात्रमा जल राख्ने)* –

ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये। शंय्योरभिस्रवन्तुनः। *(यजु. ३६।१२)*

पुष्पार्पणम् *(यो मन्त्रले कर्मपात्रमा पुष्प राख्ने)* –

ॐ श्रीश्च ते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाण मुम्मऽइषाण सर्वलोकम्मऽइषाण॥ *(यजु. ३१।२२)*

यवस्थापनम् *(यो मन्त्रले कर्मपात्रमा जौ राख्ने)* –

ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा। पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि॥ *(यजु. ५।२६)*

तिलस्थापनम् *(यो मन्त्रले कर्मपात्रमा तिल राख्ने)*–

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधयापितृँल्लोकान् पृणाहि नः स्वाहा॥

अक्षतस्थापनम् *(यो मन्त्रले कर्मपात्रमा अक्षता राख्ने)* –

ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत। अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्र तेहरी॥

आत्मसेचनम् – कुशत्रयसहितं कर्मपात्रोदकमादाय *(तीनवटा कुशका टुक्रा लिई कर्मपात्रको जल आफ्नो शिरमा र वरिपरि सेचन गर्ने)* –

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु। ॐ पुण्डरीकाक्षः पुनातु। ॐ पुण्डरीकाक्षः पुनातु।

इत्युक्त्वा पूजादेशं द्रव्याण्यात्मानञ्च सिञ्चेत।

गणपति–प्रार्थना

(पुष्प,चन्दन,अक्षता,दुवो सहित गणेशजीको प्रार्थना गर्ने) –

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशै तानि नामानि यः पठेच्छृणुयादपि। विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य नजायते॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥ अभीप्सितार्थ सिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥

स्वस्तिवाचनम्

ॐ आनो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतासऽउद्भिदः। देवानो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे॥१॥ देवानां भद्रासुमतिर्ऋजूयतां देवाना ꣳ रातिरभि नो निवर्तताम्। देवाना ꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे॥२॥ तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम्। अर्यमणं वरुण ꣳ सोममश्विना सरस्वतीनः सुभगामयस्करत्॥३॥ तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्यायुवम्॥४॥ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद्वृदे रक्षिता पायुरदब्धः स्वस्तये॥५॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु॥६॥ पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वेनो देवा अवसा गमन्निह॥७॥ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवा ꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥८॥ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः॥९॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्॥१०॥ *(यजु. २५।१४–२३)*

ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवीशान्तिरापः शान्तिरोषधय शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व ꣳ शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि॥११॥ *(यजु. ३६।१७)* **यतो यतः समीहसे ततो नो अभयं कुरु। शंनः कुरु प्रजाभ्यो भयन्नः पशुभ्यः॥१२॥** *(यजु. ३६।२२)*

॥ ॐ सुशान्तिर्भवतु॥

शङ्खपूजनम्

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते॥ ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि। तन्नः शङ्खः प्रचोदयात्। ॐ शङ्खस्थदेवाय नमः।

घण्टापूजनम्

ॐ सुपर्णोऽ सि गरुत्माँस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोम आत्माच्छन्दा ꣳ स्यङ्गानियजू ꣳ षि नाम साम ते तनूर्वामदेव्यम्। यज्ञायज्ञियंपुच्छन्धिष्ण्याः शफाः सुपर्णोऽसि गरुत्मान्दिवङ्गच्छ स्वः पत॥ *(यजु. १२।४)* **आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्। घण्टानादं प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत्॥** ॐ भूर्भुवः स्वः घण्टास्थाय गरुडाय नमः।

प्रायश्चित्तगोदानम्

गोपूजनम् *(चन्दन, अक्षता पुष्पादिले गाईको पूजा गर्ने)* –

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ ॐ इरावती धेनुमतीहि भूतꣳसूयवसिनीमनवे दशस्या॥ व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ्य पृथिवीमभितो मयूखैः स्वाहा॥ *(यजु. ५।१६)* ॐ गवे (वा गोप्रतिनिधिद्रव्याय) नमः। गन्धाक्षतपुष्पाणि समर्पयामि।

ब्राह्मणपूजनम् *(गाई दिने ब्राह्मणलाई टीका लगाई पुष्पसहितले पूजा गर्ने)* –

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च। जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

ततः मार्जनम् *(गाईको पुच्छरले शिरमा जल छर्किने)* –

ॐ मनो मे तर्प्पयत वाचं मे तर्प्पयत प्राणम्मे तर्प्पयत चक्षुर्मे तर्प्पयत श्रोत्रम्मे तर्प्पयतात्मानम्मे तर्प्पयत प्रजाम्मे तर्प्पयत पशून्मे तर्प्पयत गणान्मे तर्प्पयत गणामे मावितृषन्॥ *(यजु. ६।३१)*

गोपुच्छोदकमादाय (कुश तिल जलसहित गाईको पुच्छर छुने)–

ॐ विष्णुर्विष्णुर्विष्णुः। ॐ नमः परमात्मने, श्रीपुराणपुरुषोत्तमस्य श्रीविष्णोराज्ञया प्रवर्तमानस्याद्य श्रीब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे महायुगे सत्यत्रेता–द्वापरान्ते कलियुगे अस्य प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गतब्रह्मावर्तैकनेपालदेशे इहपुण्यभूभौ बौद्धावतारे वर्तमाने...नामसंवत्सरे ... अयने... ऋतौ महामाङ्गल्यप्रदे मासानामुत्तमे मासे (सौरेण...मासे, चान्द्रेण....मासे)... पक्षे...तिथौ ... वासरान्वितायाम् ...नक्षत्रे ... राशिस्थिते सूर्ये ... राशिस्थिते चन्द्रमसि...राशिस्थिते देवगुरौ अन्येषु शेषेषु ग्रहेषु यथा यथा राशिस्थानस्थितेषु सत्सु शुभे योगे शुभकरणे एवंगुणविशेषण– विशिष्टायां... शुभपुण्यतिथौ ...गोत्रस्य/गोत्रायाः...शर्माहं/देव्याऽहं (वर्माहं/गुप्तोऽहं) मम (पितुः/मातुः) कायिक–वाचिक–मानसिक– सांसर्गिकज्ञाताज्ञातास्पृश्यस्पर्शना–भक्ष्यभक्षणाचोष्यचोषणलेह्यलेहनाभोज्यभोजनादिजनित– सकलपापक्षयपूर्वकं करिष्यमाण........कर्मणि कर्तृत्वाधिकारसिद्ध्ये इदं प्रायश्चित्तनिमित्तकं गोनिष्क्रयीभूतं द्रव्यं रौप्यं चन्द्रदैवतं राजमुद्राङ्कितं लक्ष्मीदैवतं वा ...गोत्राय ...शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

(ब्राह्मणका हातमा वस्तु दिने) स्वस्ति। *(ब्राह्मणले भन्ने)*

प्रार्थना –

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणी। तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा *(कुश, तिल, जलसहित प्रतिष्ठा द्रव्य लिएर पानी समाउने)*–

अद्यकृतैतत् प्रायश्चित्तगोदानस्य प्रतिष्ठासिद्ध्यर्थं द्रव्यं ...दैवताकम् ...गोत्राय ...शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। *(ब्राह्मणका हातमा प्रतिष्ठाद्रव्य दिने)* ॐ स्वस्ति *(भनी ब्राह्मणले कर्तालाई जलले अभिषेक गरिदिने)*।

अर्घस्थापनम्

आफू अगाडि चन्दनले त्रिकोण लेखेर त्यहाँ चन्दन अक्षताले पूजा गरी शङ्खमुद्रा प्रदर्शन पूर्वक अर्घपात्र स्थापना गरी पूजा गर्ने –

ॐ दशकलात्मने वह्निमण्डलाय नमः। ॐ द्वादशकलात्मने सूर्यमण्डलाय नमः। ॐ षोडशकलात्मने चन्द्रमण्डलाय नमः।

आपःक्षीरं कुशाग्राणि दधि दूर्वाक्षतास्तथा। तिलाः पूगफलञ्चैव ह्यष्टाङ्गोऽर्घः प्रकीर्तितः॥ (कर्मकाण्डभास्कर, २०२०५४ : ५)

यसपछि अर्घपात्रमा पानी, दुध, कुश, दही, दुवो, अक्षता, तिल, सुपारी वा फल राख्ने। यसपछि अङ्कुशमुद्राले सूर्यमण्डलमा तीर्थहरूलाई आह्वान गरेर पूजा गर्ने। यसपछि मत्स्यमुद्राले अर्घ पात्र ढाक्ने। धेनुमुद्रा प्रदर्शन गरी अमृत स्वरूप कल्पना गर्ने।

तत अर्घदानम् *(सूर्यलाई अर्घदान गर्ने)*–

एहि सूर्य सहस्रांशो तेजोराशे जगत्पते। अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर॥

ब्राह्मणवरणम्

तत्रादौ कुशतिलजलयुतगन्धपुष्पाक्षतताम्बूलपूगीफल–वस्त्रद्रव्याभरणादीन्यादाय –

हरि ॐ तत्सत् विष्णुः ३ इत्यादिदेशकालादीन् सङ्कीर्त्य ....गोत्रः .... प्रवरः ....शर्माऽहं मम ... कर्मणि ....कर्मकर्तृ नानानामगोत्रान् नानानामशर्मणो ब्राह्मणानेभि–श्चन्दनपुष्पाक्षतताम्बूलपूगीफलवासोद्रव्याभरणादिभिर्गणपतिब्रह्महोत्राचार्यत्वेन जपपाठकत्वेन ऋत्विक्त्वेन च युष्मानहं वृणे॥

ॐ वृताः स्म इति ब्राह्मणाः ब्रूयुः।

अथ पुण्याहवाचनम्

गन्धपुष्पाक्षतताम्बूलपूगीफलद्रव्यवस्त्रादिभिस्त्रींश्चतुरः पञ्च वा ब्राह्मणन् सम्पूज्य हस्ते फलादिकं गृहीत्वा–

ॐ तत्सत् विष्णुरित्यादि देशकालौ स्मृत्वा अद्येहामुकगोत्रस्यामुकशर्मणो मम गृहेऽमुककर्मणि भो ब्राह्मणाः ॐ पुण्याहं भवन्तो ब्रुवन्तु इति त्रिः श्रावयेत्। ते च ॐ पुण्याहम् इति त्रिः प्रतिवचनं ब्रूयुः।

ॐ पुनन्तु मा देवजनाः, पुनन्तु मनसा धियः। पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा॥ *(यजु १९।३९)*

पुनः पूर्ववत् अद्येहेत्युच्चार्य – भो ब्राह्मणाः ॐ **स्वस्ति भवन्तो ब्रुवन्तु** इति त्रि श्रावयेत्। ॐ स्वस्तिः इति त्रि प्रतिवचनम्।

ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्ताक्ष्र्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ (यजु.२५।१९)

पुनः पूर्ववत् अद्येहेत्युच्चार्य – भो ब्राह्मणाः **ॐ ऋद्धिं भवन्तो ब्रुवन्तु** इति त्रि श्रावयेत्। ॐ ऋद्धिः इति त्रि प्रतिवचनम्।

ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम। दिवं पृथिव्याऽअध्यारुहामाविदाम देवान्स्वर्ज्योतिः॥ *(यजु.८।५२)*

पुनः पूर्ववत् अद्येहेत्युच्चार्य – भो ब्राह्मणाः **ॐ वृद्धिं भवन्तो ब्रुवन्तु** इति त्रि श्रावयेत्। ॐ वृद्धिः इति त्रि प्रतिवचनम्।

ॐ ज्येष्ठञ्चमऽआधिपत्यञ्च मे मन्युश्चमे भामश्च मे मश्चमेम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्॥ *(यजु.१८।४)*

पुनः पूर्ववत् अद्येहेत्युच्चार्य – भो ब्राह्मणाः ॐ **कल्याणं भवन्तो ब्रुवन्तु।** इति त्रि श्रावयेत्। ॐ कल्याणम्। इति त्रि प्रतिवचनम्।

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजान्याभ्या ꣳ शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुपमादो नमतु॥ *(यजु.२६।२)*

पुनः पूर्ववत् अद्येहेत्युच्चार्य – भो ब्राह्मणाः ॐ **शान्तिं भवन्तो ब्रुवन्तु।** इति त्रि श्रावयेत्। ॐ शान्तिः। इति त्रि प्रतिवचनम्।

ॐ द्यौः शान्तिरन्तरिक्ष६ शान्तिः पृथिवी शान्तिरापःशान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व६ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।। (यजु.३६।१७)

पुनः पूर्ववत् अद्येहेत्युच्चार्य – भो ब्राह्मणाः **ॐ श्रियं भवन्तो ब्रुवन्तु** इति त्रि श्रावयेत् । ॐ श्रीः इति त्रि प्रतिवचनम् ।

ॐ मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूना ७ रूपमन्यस्य रसो यशः श्रीः श्रयताम् ।। *(यजु ३९।४)*

गजाननं भूतगणाधिसेवितं
कपित्थजम्बूफलचारुभक्ष्यणम् ।
उमासुतं शोकविनाशकारकं
नमामि विघ्नेश्वरपादपङ्कजम् ।।

ॐ गं गणपतये नमः इति फलपुष्पादिकं श्रीगणेशं समर्पयेत् ।

तत यजमानाय आशीर्वादमन्त्रः *(यजमानलाई टीका प्रसाद आशीर्वाद दिने)–*

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ।।

इति पुण्याहवाचनम् ।

दीपपूजनम्

दीपप्रज्ज्वलनम् *(दीयो बाल्ने)–*

ॐ स्थिरो भव व्विड्वङ्गऽआशुर्भव वार्ज्यवन् ।
पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ।। *(यजु ११।४४)*

इति दीपं प्रज्वालयेत् ।

दीपपूजनम् *(यो मन्त्रसहित पाद्यादि षोडशोपचारले दीप पूजन गर्ने)–*

ॐ पृष्टोदिवि पृष्टोऽअग्निः पृथिव्व्यां पृष्टो व्विश्वाऽओषधीराविवेश । व्वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा सरिषस्प्पातुनक्तम् ।। *(यजु. १८।७३)*

इति मन्त्रं पठित्वा षोडशोपचारैर्दीपं पूजयेत् ।

दीपप्रार्थना–

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ।। ॐ दीपनारायणाय नमः ।

कलशपूजनम्

भूसंस्कारः *(भूमिको पूजा गर्ने)–*

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया व्विश्श्वस्य भुवनस्यधर्त्री । पृथिवीं यच्छपृथिवीन्दृ६ हपृथिवीम्म्माहि६सीः ।। *(यजु.१३।१८)*

गोमयलेपनम् *(गाईको गोवरले भूमि लिप्ने)–*

ॐ मानस्त्तोके तनये मानऽआयुषिमानो गोषुमानोऽ अश्श्वेषुरीरिषः । मानो व्वीरान्नुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।। *(यजु.१६।१६)*

धान्यस्थापनम् *(धान राख्ने)–*

ॐ धान्यमसि धिनुहि देवान्प्राणायत्त्वोदानायत्त्वा व्यानायत्त्वा । दीर्घामनु प्रसितिमायुषे धान्देवोवः सविताहिरण्यपाणिः
प्रतिगृभ्भ्णात्त्वच्छिद्द्रेण पाणिना चक्षुषे त्वा महीनाम्पयोसि ।।
(यजु.१।२०)

कलशस्थापनम् *(धानमाथि कलश स्थापना गर्ने)–*

ॐ आ जिग्घ्र कलशं मह्यात्त्वा व्विशन्त्विन्दवः । पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्क्ष्वोरुधाराः पयस्वतीः पुनर्माव्विशताद्द्रयिः ।। *(यजु. ८।४२)*

तीर्थजलप्रक्षेपः *(कलशमा गङ्गाजल राख्ने)–*

ॐ व्वरुणस्योत्तम्भनमसि वरुणस्य स्क्कम्भसर्जनी स्त्थो व्वरुणस्यऽऋतसदन्यसि वरुणस्यऽ ऋतसदनमसि वरुणस्यऽऋतसदनमासीद ।। *(यजु. ४।३६)*

सर्वौषधीप्रक्षेपः *(कलशमा सर्वौषधि राख्ने)–*

ॐ याऽओषधीः पूर्व्वा जाता देवेब्भ्यस्त्रियुगं पुरा ।
मनैनुबब्भ्रूणामह ६ शतन्धामानिसप्त च । *(यजु.१२।७५)*

पञ्चरत्नप्रक्षेपः *(कलशमा पञ्चरत्न राख्ने) –*

ॐ हिरण्यगब्र्भः समवर्तताग्रे भूतस्यजातः पतिरेकऽ आसीत् । सदाधार–पृथिवीन्द्यामुतेमाङ्कस्मैदेवाय–हविषा व्विधेम ।। *(यजु.२३।१)*

फलप्रक्षेपः *(यो मन्त्रले कलशमा फल राख्ने)–*

ॐया: फलिनीर्याऽअफलाऽअपुष्पायाश्श्च पुष्पिणीः ।
बृहस्पतिप्प्रसूतास्त्तानोमुञ्चन्त्व ७ हसः ।। *(यजु.१२।८९)*

यवप्रक्षेपः *(कलशमा जौ राख्ने) –*

ॐओषधयः समवदन्तसोमेनसहराज्ञा ।
यस्म्मै कृणोतिब्ब्राह्मणस्त्त ६ राजन्न्पारयामसि ।।
(यजु.१२।९६)

गन्धप्रक्षेपः *(कलशमा चन्दन राख्ने)–*

ॐ गन्धद्वारां दुराधर्षान्नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ।।

दूर्वाप्रक्षेपः *(कलशमा दुवो राख्ने)–*

ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्प्परि । एवानो दूर्व्वेप्प्रतनुसहस्रेणशतेनच ।। *(यजु.१३।२०)*

सप्तमृत्तिकाप्रक्षेपः*(कलशमा सप्तमृत्तिका राख्ने)–*

ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी ।
यच्छानः शर्म्मसप्प्रथाः ।। *(यजु. ३६।१३)*

पञ्चपल्लवप्रक्षेपः *(कलशमा पञ्चपल्लव राख्ने)–*

ॐ अश्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता ।
गोभाजऽइक्त्किलासथयत्त्सनवथपूरुषम् ।। *(यजु.१२।७०)*

आम्रपल्लवप्रक्षेपः *(कलशमा आँपका पात राख्ने)–*

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ।
ससस्त्यश्वकः सुभद्द्रिकाङ्काम्पीलवासिनीम् ।।
(यजु.२३।१८)

वस्त्रवेष्टनम् *(कलशमा रातो सेतो वस्त्र बाँध्ने)–*

ॐ बृहस्पतेऽअति यदर्य्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋत प्रजाततदस्म्मासु द्रविणं धेहिचित्रम् ।। उपयामगृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पतये त्वा ।। *(यजु. २६।३)*

वरुणस्यावाहनम् *(कलशमा वरुण देवताको आवाहन गर्ने)–* **ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्त्तदाशास्त्ते यजमानोहविर्ब्भिः । अहेडमानो वरुणेहबोद्ध्युरुश ६ स मा नऽआयुः प्रमोषीः ।।** *(यजु. २१।२०)*

कलशे गङ्काद्यावाहनम् *(कलशमा समुद्र, गङ्गादि नदीहरूको आवाहन गर्ने)–*

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।।

कलशं स्पृष्ट्वा अभिमन्त्रणम् *(कलशमा छुने)–*

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणः स्मृतः ।।
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।।
अङ्गैश्चसहिताः सर्वे कलशं तु समाश्रिताः ।

कलशप्रार्थना *(कलशमा आवाहित देवताको प्रार्थना गर्ने)–*

ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भो विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ।।

इति कलशं पूजनम् ।

गणेशपूजनम्

गणेशावाहनम् *(गणेशजीलाई आवाहन गर्ने) –*

ॐ गणानान्त्वा गणपति ६ हवामहे प्प्रियाणान्त्वा प्प्रियपति६हवामहे निधीनान्त्वा निधिपति६हवामहे व्वसोमम । आहमजानि गब्र्भधमात्वमजासि गब्र्भधम् ।। *(यजु. २३।१९)*

ॐ हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज ।
सिद्धिबुद्धिपते त्र्यक्षलक्षलाभयितः पितः ।।
नागस्य नागहार त्वं गणराज चतुर्भुज ।
भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ।
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।
इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष माम् ।।

ॐ भूर्भुवः स्वः गणपतये सिद्धिबुद्धिसहिताय सायुधाय सवाहनाय सपरिवाराय इदमासनं समर्पयामीति प्रतिप्रयोगं सहस्रशीर्षेत्यादिमन्त्रैः षोडशोपचारैः पूजयेत् ।

(यसपछि आसन पाद्य आदि षोडशोपचारले गणेशजीको पूजा गर्ने) –

आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम स्नानीयम्, यज्ञोपवीतम्, वस्त्रम्, गन्धम्, सिन्दूरम्, अक्षतान्, पुष्पाणि, दूर्वाङ्कुरान्, धूपम्, दीपम्, नैवेद्यम्, आचमनीयम्, ताम्बूलम्, अलङ्कारादिदक्षिणाद्रव्यम् च समर्पयामि

ॐ गणपतये नमः ।

पूजनम् *(दुवो अर्पणपूर्वक गणेशजीको पूजा गर्ने) –*

ॐ श्रीमन्महागणाधिपतये नमः ।
ॐ उमापुत्राय नमः । ॐ ईशपुत्राय नमः ।
ॐ एकदन्ताय नमः । ॐ मूषकवाहनाय नमः ।
ॐ अघनाशनाय नमः । ॐ सर्वसिद्धिप्रदाय नमः ।
ॐ इभवक्त्राय नमः । ॐ कुमारगुरवे नमः ।
ॐ ऋद्धिसिद्धिसहिताय श्रीगजाननाय नमः ।

ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ।
एवा नो दूर्व्वेप्प्रतनुसहस्रेण शतेन च ।।

ॐ भूर्भुवः स्वः गणपतये नमः । दुर्वाङ्कुरान् समर्पयामि ।

गणेशस्तुतिपूर्वकं फलनिवेदनम् *(सिङ्को फलसहित गणेशजीको प्रार्थना)–*

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ।।
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।।
अनेन फलदानेन फलदोऽस्तु सदा मम ।।

इति स्तुत्वा फलं निवेदयेत् ।

(प्रार्थनापछि फल गणेशजीमा चढाइदिने) ।

रक्षाबन्धनपूजनम्

यवदूर्वासर्षपचन्दनगोमयदधिसहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन् नारायणकवचं पठेत् *(जौ, दुवो, सस्र्युँ, चन्दन, गोवर, दही सहित रक्षाबन्धनलाई तामाको भाँडामा राखी पात्रलाई छोई नारायणकवच पढ्ने) –*

ॐ पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः ।
याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ।।
वारुण्यां केशवो रक्षेद्वायव्यं मधुसूदनः ।
उत्तरे श्रीधरो रषेददधस्तात्तु महीधरः ।।
एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः ।
यज्ञाग्रे रक्षताच्छङ्खः पृष्ठे वै पद्ममुत्तमम् ।।
वामपाशर्वे गदा रक्षेद् दक्षिणे तु सुदर्शनः ।
उपेन्द्रः पातु ब्रह्मणमाचार्यं पातु वामनः ।।
ऋग्वेदमुच्यतो रक्षेद्यजुर्वेदमधोक्षजः ।
कृष्णो रक्षतु सामानमथर्वाणञ्च माधवः ।।
उपविष्टाँश्च विप्राँस्ताननिरुद्धोऽभिरक्षतु ।
यजमानं सपत्नीकं पुण्डरीकाक्ष एव तु ।।
रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः ।
वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैस्तु सर्षपैः ।
कृत्वा पोटलिकां पूर्वं बध्नीयाद्दक्षिणे करे ।।

वक्षमाणमन्त्रैर्पूजयेत् (रक्षबन्धनको पूजा गर्ने) –

ॐ रक्षोहणं वलगहनं वैष्णवीमिदमहन्तं वलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहन्तं वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं वलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ।।

ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्य मित्रहा ।।

ॐ रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो वलगहनोवनयामि वैष्णवान्रक्षोहणौ वां वलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्थ ।। *(यजु. ५।२३–२५)* **ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतोलोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ।।***(यजु. ३४।५५)*

गणपत्यादि वनस्पत्यन्तदेवता कलशस्कन्धप्रदेशे पूजनम् *(कलशमा चामलको पूर्णपात्र र सो माथि जनै सुपारी सहित ईशान कलशमाथि राखेर पूजा गर्ने) –*

सर्वतोभद्रस्थ देवताभ्यो नमः ।
गणपति–सूर्य–देवी–शिवविष्णुभ्यो नमः ।
विनायकदुर्गावाय्वाकाशाश्विनिकुमारेभ्यो नमः ।
सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुकेतुभ्यो नमः ।
ईश्वररोमास्कन्दहरिब्रह्मेन्द्रयमकालचित्रगुप्तेभ्यो नमः ।
अग्नि–अप्–भूमिविष्णु–इन्द्र–इन्द्राणी–प्रजापति–सर्वब्रह्मणे नमः । इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तेभ्यो नमः । ध्रुवाद्याष्टवसुभ्यो नमः । धात्रादिद्वादशादित्येभ्यो नमः । वीरभद्राद्येकादशरुद्रेभ्यो नमः । गौर्यादिषोडशमातृभ्यो नमः ।
आवाहादिसप्तमरुद्भ्यो नमः ।
विनायकब्रह्माविष्णुरुद्रार्कवनस्पतिभ्यो नमः ।

प्रार्थना –

सूर्य शौर्यमथेन्दुरिन्द्रपदवीं सन्मङ्गलं मङ्गलः ।
सद्बुद्धिश्च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ।
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ।।

वाग्दानविधिः (सङ्क्षिप्त)

(विवाहपूर्व कुरा छिन्ने /फूलमाला/टीकाटालो)

१. कर्मपात्र सम्पादन । २. प्रायश्चित्तगोदानम्

३. प्रतिज्ञासङ्कल्पः

ॐ अद्येहेत्यादि सङ्कल्पमुच्चर्य .... गोत्रः ....प्रवरः ....नामशर्मा/वर्मा ....वा अहं मम .....गोत्राया ....प्रवराया .....नाम्नीकन्यायाः करिष्यमाण–विवाहाङ्गभूतवाग्दानकर्म दीपकलशगणेशपूजनपूर्वकमहं करिष्ये ।

४. दीप–कलश–गणेशपूजनम्

५. ब्राह्मणवरणम् पुण्याहवाचनम् च

६.वाग्दानम् *(कन्यादाताले वरलाई पूर्व फर्काइ राखी टीका लगाइदिने । वरको दायाँ पट्टि कन्यालाई पनि राखी टीका लगाइदिने । वरलाई दिने सामग्रीहरू जनै, सुपारी, पान, नरिवल, अक्षता, फूल, माला, दूवो आदि दिन तयार पारिएका वस्तु हातमा लिएर मङ्गलपाठका साथ सङ्कल्प गर्ने) –*

ॐ अद्येहेत्यादिसङ्कल्पमुच्चार्य ...गोत्रः.....प्रवरः ....शर्मा/ वर्मा/देवी ....वा अहं मम .....गोत्रोत्पन्नाम् .... नाम्नीकन्यां .....गोत्राय ......प्रवराय .... नाम्ने वराय तुभ्यं ज्योतिर्विदादिष्टे सुमुहूर्ते स्वशाखोक्तविधिना दास्ये इति वाचा, वाचां सम्प्रददे ।

७. वरप्रार्थना *(कन्यापक्षकाले वरलाई सम्बोधन गरी प्रार्थना गर्ने) -*

ॐ अव्यङ्गेऽपतितेऽक्लीबे दशदोषविवर्जिते । इमां कन्यां प्रदास्यामि देवाग्निद्विजसन्निधौ ।।

ॐ वाचा दत्ता मया कन्या पुत्रार्थं (आत्मार्थं) स्वीकृता त्वया । कन्यावलोकनविधौ निश्चिन्तस्त्वं सुखी भव ।।

८. वरसम्बोधनम् *(वरले भन्ने) -*

ॐ वाचा दत्ता त्वा कन्या पुत्रार्थं (आत्मार्थं) स्वीकृता मया । वरावलोकनविधौ निश्चिन्तस्त्वं सुखी भव ।।

९. दक्षिणादानम् विष्णुस्मरणम् च ।

।। इति वाग्दानविधिः ।।

जन्मोत्सव विधिः अष्टचिरञ्जीविपूजनम्

(स्नान, कर्मपात्र सम्पादन,प्रायश्चित्त गोदान, प्रतिज्ञा सङ्कल्प, पाद्यार्घादिसम्पादन, ब्राह्मणवरण, पुण्याहवाचन, दीप, कलश, गणेश पूजन पूर्वक मार्कण्डेयादि अष्टचिरञ्जीवीको पूजा गर्नुपर्दछ ।)

स्नानसङ्कल्पः – **ॐ अद्येहेत्यादिसङ्कल्पमुच्चार्य...***(देश कला आदि सम्पूर्ण सङ्कल्पवाक्य उच्चारण गरी)* **.....गोत्रो.... राशि ...शर्माहं आयुआरोग्याभिवृद्धये संवत्सरावच्छिन्नसुख प्राप्तिकामस्तिलकल्कीमिश्रिततिलोदकेन स्नानं करिष्ये ।**

नवीनवस्त्रधारणम् –

ॐ परिधास्ये यशोधास्यै दीर्घायुत्वायजरदष्टिरस्मि ।
शतं च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये ॥

प्रतिज्ञासङ्कल्पः – **ॐ अद्येहेत्यादि सङ्कल्पमुच्चार्य** *(सम्पूर्ण सङ्कल्पका वचन उच्चार गरी)* **...गोत्रो ...राशि....शर्मा÷देवी अहं मम जन्मदिवसे .....वर्षवृद्धौ जन्मोत्सवकर्मणि दीर्घायु रारोग्यैश्वर्योदयाद्यभिवृद्ध्यर्थम् दीपकलशगणेशपूजनपूर्वकं मार्कण्डेयाद्यष्टचिरञ्जीवीनां महाषष्ठिकायाश्च यथामिलितोपचारैः पूजनमहं करिष्ये ।**

ततो ब्राह्मणवरणं पुण्याहवाचनं च विधाय दीपकलशगणेशं यथाविधिना पाद्यादिभिरुपचारैः सम्पूजयेत् ।



तत अष्टदलेषु मार्कण्डेयादि अष्टचिरञ्जीवीपूजनम् –

(थालीमा अष्टदल बनाई माझमा षष्ठीका देवीको प्रतिमा र वरिपरि आठ कोणमा मार्कण्डेयादि अष्टचिरञ्जीवीको प्रतिमा स्थापना गरी षोडशोपचारले पूजा गर्ने) –

